# विवादरत्नाकरः

राष्ट्रिय संस्कृत संस्थान
नई दिल्ली

inheritance to a deceased man's estate is preceded in the latter school by the capacity of the heir to offer *pinda* to the deceased, while in the former school, it is followed by the duty of the heir to offer *pinda* to the same.

## OTHER CIVIL MATTERS.

This division deals with the following topics: interest on debts, compound interest, mortgage and hypothecation of moveable and immoveable properties, accrual of right by adverse possession, non-payment of debts, suretyship, deposit and pledge, sale without ownership, concerns among partners, resumption of gifts, non-performance of agreements of service, continuance of service, conditions of menial service, non-payment of wages, rules regarding the fees of prostitutes, disputes between the owner of cattle and his servants, rescission of sale and purchase, disputes over boundaries, bridges over corn-fields, cultivation on lease and the preservation of harvests.

## CRIMINAL LAW.

The topics concerned with Criminal Law deal among others with the punishment for the five following principal categories of crime recognised by the Hindu jurists: murder, theft, rape, defamation and assault. Thieves have been divided into prakāsá-taskara ("Thieves" proper) and aprakāsá-taskara (cheats). Rape has been subdivided into "rape" proper, kidnapping, adultery, fornication, and unnatural offences.

## JUDICIAL DECISIONS.

Though the principles of inheritance, as enunciated in the present treatise, have been given tacit consent to by the British Indian Legislature, yet some minor changes have been wrought by the operation of judicial decisions, by virtue of which the adoption of an only son has been validated, the subsequent unchastity of a widow has not been allowed to divest property already vested, and the chances of the ultimate heirship of a co-villager Brahmin have been destroyed.

## अकारादिक्रमेण

# विवादरत्नाकर-विषयसूची।


| विषयः | पृष्ठाः | विषयः | पृष्ठाः |
|---|---|---|---|
| अकृतवृद्धितरङ्गः ... | १६ | कृष्टाकृष्टतरङ्गः ... | २२५ |
| अदण्ड्यतरङ्गः ... | २३७ | क्रियाभेदतरङ्गः ... | ६२५ |
| अनेकमातृकभ्रातृ-विभागतरङ्गः ... | ४७५ | क्रीततरङ्गः ... ... | ५७६ |
| अपविद्धतरङ्गः ... | ५७८ | क्रीत्वानुशयतरङ्गः ... | १९४ |
| अपुत्रधनविभागतरङ्गः | ५९५ | क्षेत्रजतरङ्गः ... | ५६० |
| अप्रकाशतस्करतरङ्गः ... | ३१४ | गूढोत्पन्नतरङ्गः ... | ५७१ |
| अप्रजाधनव्यवस्थातरङ्गः | ५२२ | ग्रन्थकारपरिचयः ... | १ |
| अवलुप्तविभागः ... | ५२९ | ग्रन्थकारप्रशस्तिः ... | ६७६ |
| अविभाज्यतरङ्गः ... | ५०१ | ग्रन्थोपक्रमणिका ... | १ |
| अभिगमतरङ्गः ... | ३८८ | घातकान्वेषणतरङ्गः ... | ३७६ |
| अभ्युपेत्याशुश्रूषातरङ्गः | १३९ | चौरान्वेषणतरङ्गः ... | ३३२ |
| आधिविधिः ... | २४ | जीवत्पितृकभागः ... | ४६३ |
| आधिसिद्धिः ... | ३७ | तरशुल्कतरङ्गः ... | ६४५ |
| उद्ग्राहणविधिः ... | ६९ | दण्डप्रणयणविधिः ... | ६५२ |
| ऋणादानविधिः ... | ५ | दण्डपारुष्यतरङ्गः ... | २५८ |
| ऋणादानविवादपदं ... | ५० | दण्डसंज्ञा ... ... | ६७० |
| औरसपुत्रलक्षणतरङ्गः | ५५७ | दण्डोत्कर्षतरङ्गः ... | ६५७ |
| कन्यादूषणतरङ्गः ... | ४०१ | दत्तकतरङ्गः ... | ५७३ |
| कानीनतरङ्गः ... | ५६९ | दत्ताप्रदानिकतरङ्गः ... | १२७ |
| कृत्रिमपुत्रतरङ्गः ... | ५७९ | दायभागतरङ्गः ... | ४५६ |
| | | दास्यमोक्षतरङ्गः ... | १४७ |

# अथ पञ्चमांशः सिद्धितरङ्गः।

102. तत्र व्यासः।

आधयो द्विविधाः प्रोक्ताः स्थावरा जङ्गमास्तथा।
सिद्धिरस्योभयस्यापि भोगो यद्यस्ति नान्यथा॥

103. बृहस्पतिः।

न भुङ्क्ते यः स्वमाधानं नादद्यान्न निवेदयेत्।
प्रमीतसाक्षिकर्णिकं तस्य लेख्यमपार्थकम्॥

अत्र यथातथेत्यध्याहरणीयम्। प्रमीतसाक्षिकर्णिकं साक्षि-कर्णिकशून्यं, तेन यथा साक्षिकर्णिकौ विना लिखितमसाक्षि-कर्णिकं लेख्यमपार्थकं भवति, तथा यो न भुङ्क्ते स्वमाधानमाधिं तं नात्मीयं करोति न च तमाधिं गृहीतमन्यस्मै बोधयति तस्य सम्पूर्णमपि लेख्यं साध्यांशे न प्रमाणमित्यर्थः। अत्र च न भुङ्क्ते इति भोग्याधौ द्रष्टव्यं, नादद्यादिति गोप्याधौ द्रष्टव्यं, न निवेदये-दित्युभयत्र। एतच्च प्रायिकतया भुक्ताभुक्तयोर्विभावनाभावेऽपि भोग्य-गोप्ययोराधित्वस्थैर्य्यात्।

104. तथा।

गृहवार्य्यापणं धान्यं पशुस्त्रीवाहनानि च।
उपेक्षया विनश्यन्ति यान्ति चासारतां तथा॥

आपणः पण्यविक्रयस्थानम्। गृहादीन्याधीकृतानि यदि आधि-ग्रहीतृदोषात् विनश्यन्ति असारतां वा यान्ति तदा आधित्वमेव